# आदर्शप्रश्नपत्रम्
# संस्कृतम्- सम्प्रेषणात्मकम् 122
## कक्षा-नवमी
## सङ्.कलनात्मकं मूल्याङ् कनम्

समय:-होरात्रयम् पूर्णाङ् का:-90

निर्देशा:-

(i) प्रश्नपत्रे चत्वार: खण्डा: सन्ति-

| | | |
|---|---|---|
| खण्ड: क | (अपठित-अवबोधनम्) | 10 अङ्का: |
| खण्ड: ख- | (रचनात्मकं-कार्यम्) | 15 अङ्का: |
| खण्ड: ग | (अनुप्रयुक्त-व्याकरणम्) | 30 अङ्का: |
| खण्ड: घ | (पठित-अवबोधनम्) | 35 अङ्का: |

(ii) सर्वे प्रश्ना: अनिवार्या: ।

(iii) प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि ।

(iv) प्रश्नसंख्या अवश्यमेव लेखनीया ।

(v) उत्तराणि संस्कृतेनैव लेखनीयानि ।

**खण्ड: 'क' - अपठित-अवबोधनम्** **10 अङ्का:**

1. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतेन लिखत-

एकदा एक: संन्यासी एकस्य नृपस्य भवनमागच्छत् । नृप: तस्य हार्दिकं स्वागतमकरोत् भोजनादिकं चाकारयत् । तदनन्तरं राजा अपृच्छत् 'मत्कृते सर्वाधिकं करणीयं किमस्ति येनाहं पुण्यं प्राप्तुं शक्नुयाम्?' स्पष्टवक्ता संन्यासी अवदत् यत् पुण्यप्राप्त्यर्थम् अधिकाधिकं शयनं भवता कर्तव्यम् । नृप: विस्मयेन अपृच्छत् -एतत् कीदृशं करणीयं कथ्यते भवता । शयनेन कीदृशं पुण्यं प्राप्तुं शक्यते मया? अहं तु सर्वथासमर्थ: एतदवगन्तुम् ?' संन्यासी हसित्वाअवदत्-' यावदधिकं भवान् स्वप्स्यति तावदधिकमेव प्रजा भवत: अत्याचारेभ्य: मुक्ता स्थास्यति । तावदेव भवत: पापानामपि क्षय: भविष्यति ।' एतदुक्त्वा संन्यासी तु अगच्छत् नृपश्च तूष्णीं भूत्वा विचारमग्न: अतिष्ठत् ।

I एकपदेन उत्तरत - ½ x 4 = 2

(i) नृपेण केन पुण्यं प्राप्तुं शक्यते स्म?

(ii) प्रजा नृपस्य केभ्य: मुक्ता भविष्यति?

(iii) संन्यासिन: हार्दिकं स्वागतं क: अकरोत्?

(iv) स्पष्टवक्ता क: आसीत्?

JSUNIL TUTORIAL

II पूर्णवाक्येन उत्तरत- 2 x 2 = 4

(i) संन्यासी हसित्वा किम् अवदत् ?
(ii) नृप: विस्मयेन संन्यासिनं किम् अपृच्छत्?
(iii) अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत 2

(iv) दत्तविकल्पेभ्य: शुद्धम उत्तरं चित्वा लिखत- ½ x 4 = 2

(i) 'आश्चर्येण' इत्यर्थे किं पदम् अत्र प्रयुक्तम्?

(अ) शयनेन (ब) विस्मयेन

(स) भवता (द) विचारेण

(ii) जागरणम् इति पदस्य किं विलोमपदम् अनुच्छेदे प्रयुक्तम्?

(अ) पुण्यम् (ब)करणीयम्

(स) शयनम् (द) क्षय:

(iii) 'अधिकाधिकं शयनं भवता कर्तव्यम् ' अस्मिन् वाक्ये 'भवता' इति पदं कस्मै प्रयुक्तम् ?

(अ) संन्यासिने (ब) प्रजायै

(स) पुण्याय (द) नृपाय

(iv) 'स्थास्यति' इति क्रियापदस्य कर्तृपदं किम्?

(अ) संन्यासी (ब) नृप:

(स) शयनम् (द) प्रजा

## खण्ड: 'ख'-

**(रचनात्मक कार्यम्)]** 15 अङ्का:

2. भवान् प्राचीश:। भवत: मित्रं प्रणीत: परीक्षायाम् उत्तमाङ्कान् न प्राप्तवान् अत: हतोत्साहित:। तं प्रेरयन्तं लिखितं पत्रं मञ्जूषा: साहाय्येन पूरयत- ½ x 10 = 5

कुरेञ्जीछात्रावास:

(i)................................

प्रियं (ii)...................... प्रणीत

अत्र सर्वगतं कुशलमस्ति तव च कुशलम् ईश्वरं प्रार्थयामि। मया ज्ञातं यत् स्वपरीक्षापरिणामं दृष्ट्वा (iii)...................... भवान् स्वजीवनमेव समापयितुं उद्यत: जात:। मित्र! स्वीकरोमि अहं यत् शिक्षाया: समारम्भादेव भवान् सर्वदैव उत्तमाङ्कान् एव प्राप्नोति स्म। परं मित्र एकया असफलतया एतादृश: हतोत्साहित: तु मा भवेत्। (iv)........................... एतादृशं मूल्यहीनं तु नास्ति यत् वयम् एवमेव समापयेम। यदा पिपीलिका: अपि पुन: पुन: प्रयासेन भित्तिम् आरोढुम् समर्थ।: भवति। तदा असफल: भूत्वा अपि नर: नवीनोत्साहेन सफलतायै (v)................किमर्थम् न कुर्यात्? वस्तुत: सफलताअपि असफलताया: सोपानानि (vi)...................... उत्तीर्य एव प्राप्यते। मनुष्य: एव सृष्टे: (vii)......................... कृति:/ स: बुद्धिबलेन सदैव नवीनान् उपायान् (viii)......................... आशासे यद् भविष्ये त्वमेतादृशं चिन्तयिष्यसि जीवनमूल्यं च अवगमिष्यासि ।

तव (ix)........................तव

तव (x)..............................मित्रम्

SUNIL TUTORIAL

प्राचीशः

| | | | | |
|---|---|---|---|---|
| (i) सर्वोत्तमा | (ii) मानवजीवनम् | (iii) अभिन्नम् | (iv) धैर्येण | (v) मित्र |
| (vi) निराशः | (vii) फरीदाबादतः | (viii) प्रयत्नम् | (ix) चिन्तयति | (x) जीवनाकाङ्क्षी |

3. अधः प्रदत्तचित्रस्य वर्णनं संस्कृते न पञ्च वाक्येषु कुरुत-

(सहायतार्थं मञ्जूषा प्रदत्ता) 2 x 5 = 10



मञ्जूषा — आरक्षकाः, वनस्य, अनेके, चत्वारः, आक्रमणम्, दृश्यम्, वृक्षाः, चित्रकः, आत्मानम्, हरीतिमा, रक्षति, भुशुण्डी (बन्दूक) , हस्ते,

अथवा

मञ्जूषायां प्रदत्तशब्दानां सहायतया 'वनानां महत्वम्' इति विषयम् अधिकृत्य पञ्चवाक्यानि संस्कृतेन लिखत ।

मञ्जूषा– पर्यावरणस्य, हरीतिमा, वृष्टिः, वनानि, रक्षणम्, पशूनाम्, निवासस्थानम्, कुर्वन्ति, सर्वत्र, दृश्यते

## खण्डः'ग' (अनुप्रयुक्त-व्याकरणम्) 30 अङ्काः

4. उचितशब्दरूपाणि चित्वा रिक्तस्थानानि पूरयत- ½ x 12 = 6

(i) प्रजानाम् सुरक्षा एव ......................... धर्मः भवति।

(अ) राजानः (ब) राजानम्

(स) राज्ञाम् (द) राजसु

(ii) छात्राः आचार्यमवदन् वयं तु ............... अनुपालयामः।

(अ) भवन्तम् (ब) भवताम्

(स) भवान् (द) भवेत

JSUNIL TUTORIAL

(iii) ........................ प्रजाया: परमविश्वास: भवेत् एतदर्थं तेन प्रयातितव्यम्।

(अ) राज्ञे (ब) राज्ञि

(स) राज्ञ: (द) राजानम्

(iv) मनुष्य: कदापि ............................ प्रतिकूलानि परेषां न समाचरेत्।

(अ) आत्मान: (ब) आत्मना

(स) आत्मानम् (द) आत्मनि

(v) सर्वेषां जनानां मनसि ........................ परमश्रद्धा भवति ।

(अ) विद्वद्भि: (ब) विदुष:

(स) विद्वद्भ्य: (द) विद्वत्सु

(vi) इदं जलं ........................ बालकाय प्रयच्छ ।

(अ) गच्छद्भ्याम् (ब) गच्छन्

(स) गच्छद्भ्य: (द) गच्छते

(vii) एते सर्वे जना: .................... सन्ति ।

(अ) विदुष: (ब) विद्वान्

(स) विद्वांस: (द) विद्वस्

(viii) ........................ केषां महापुरुषाणां नामानि जानन्ति?

(अ) भवान् (ब) भवन्तौ

(स) भवन्त: (द) भवताम्

(ix) ......................... बालकै: अद्य किं पठितम् ?

(अ) गच्छद्भि: (ब) गच्छतै:

(स) गच्छत्भि: (द) गच्छद्भ्य:

(x) गुणानुरागी नृप: ........................ धनं मानं च प्रयच्छति ।

(अ) विदुष: (ब) बिदुषि

(स) विदुषे (द) विद्वांसम् ।

(xi) मनुष्य: कदापि ............................ न अवसादयेत् !

(अ) आत्मनम् (ब) आत्मानम्

(स) आत्मन् (द) आत्मनि

(xii) ................................ बालकेषु प्रणव: कस्य नाम?

(अ) गच्छतेषु (ब) गच्छनतेषु

(स) गच्छत्सु (द) गच्छन्तीषु

SUNIL TUTORIAL

5. उचितसङ्ख्यावाचकैः शब्दैः रिक्तस्थानानि पूरयत- ½ x 12 = 6

(i) आम्रवृक्षे.......................... वानराः तिष्ठन्ति।

(अ) चत्वारि (ब) चतुरः

(स) चत्वारः (द) चतस्रः

(ii) .............................. वाटिकायाम् जनाः भ्रमन्ति।

(अ) एकस्याम् (ब) एकाम्

(स) एकस्मिन् (द) एकस्याः

(iii) तत्र .................................. उद्यानेषु नवतिः आम्रवृक्षाः।

(अ) त्रिषु (ब) तिसृषु

(स) त्रयः (द) त्रीषु

(iv) विद्यालये मया ............................. वृक्षाः आरोपिताः।

(अ) पञ्चाः (ब) पञ्च

(स) पञ्चन् (द) पञ्चा

(v) दशरथस्य .................................. भार्याः आसन्।

(अ) तिसृः (ब) तिस्रः

(स) त्रयः (द) त्रीन्

(vi) वयं ........................... हस्ताभ्याम् संयोजनेन सर्वदेवान् नमेम।

(अ) द्वयाभ्याम् (ब) द्वाभ्याम्

(स) दवाभ्याम् (द) द्वाभ्याम

(vii) अहम् .............................. बालकाय एव पारितोषिकं दास्यामि।

(अ) एकस्मैं (ब) एकाम्

(स) एकस्यै (द) एकम्

(viii) .................................................. बालकैः एतत् चित्रं रचितम्।

(अ) चतुरः (ब) चतसृभिः

(स) चतुर्भिः (द) चत्वारि

(ix) .................................... बालिकानाम् विद्यालयः कुत्र ?

(अ) चतुर्षु (ब) चतुर्णाम्

(स) चतसृष (द) चतसृणाम्

(x) ..................... बालकयोः महती शक्तिः अस्ति ।

(अ) द्वयोः (ब) द्वितीययोः

(स) द्वौ (द) दवयोः

SUNIL TUTORIAL

(xi) तत्र ................................ बालिकायाः पितरौ आगतौ।

(अ) एकस्य (ब) एकस्याः

(स) एकस्या (द) एकस्याम्

(xii) ...................... छात्रैः अद्य पुरस्कारः विजितः।

(अ) त्रयः (ब) तिसृभिः

(स) त्रिभिः (द) त्रयोभिः

6. उचितधातुरूपाणि चित्वा रिक्तस्थानानि पूरयत- ½ x 12 = 6

(i) सः अद्य कक्षायाम् अवश्यमेव ............................ ।

(अ) सन्तु (ब) अस्तु

(स) स्ताम् (द) सन्ति

(ii) वयं कक्षायां सदैव ध्यानेन ............................ ।

(अ) पठेम (ब) पठाानि

(स) पठेयम् (द) पठेव!

(iii) त्वम् उत्तमाङ्.कान् प्राप्तुम् अवश्यमेव............................।

(अ) इच्छतु (ब) इच्छन्तु

(स) इच्छ (द) इष

(iv) यूयम् इदं कार्यम् अवश्यमेव..............................।

(अ) कुर्याः (ब) कुर्यातम्

(स) कुर्यात् (द) कुर्यात

(v) ते इदं ................................ यत् एतत् कार्यं कथं भविष्यति?

(अ) चिन्तयतु (ब) चिन्तयन्तु

(स) चिन्तय (द) चिन्तयत

(vi) आवाम् सर्वदेवान् मनसा ..................................।

(अ) नमेताम् (ब) नमानि

(स) नमेव (द) नमेतम्

(vii) सर्वेभ्यः छात्रेभ्यः मिष्टान्नानि तु ........................ एव।

(अ) रोचताम् (ब) रोचेताम्

(स) रोचन्ताम् (द) रुच्यन्ताम्

(viii) त्वं किमपि न ............................ परिश्रमे एव विश्वासं कुरु।

(अ) याचताम् (ब) याचेताम्

(स) याचस्व (द) याचन्ताम्

SUNIL TUTORIAL

(ix) वयं स्वपितृन् अवश्यमेव ..............................।

(अ) सेवेवहि (ब) सेवेमहि

(स) सेवेरन् (द) सेवेधवम्

(x) त्वं स्वपरिणामं दृष्ट्वा अवश्यं ....................।

(अ) मोदेत: (ब) मोदेयाथाम्

(स) मोदेथा: (द) मोदेय

(xi) स: एव अद्य भोजनं ......................................।

(अ) पचेय (ब) पचेत

(स) पचे: (द) पचेत्

(xii) अहम् ईश्वरम् अवश्यमेव ................................।

(अ) भजस्व (ब) भजामहै

(स) भजेताम् (द) भजै ।

7. मञ्जूषात: उचितानि पदानि चित्वा अधोलिखिते अनुच्छेदे रिक्तस्थानानि पूरयित्वा अनुच्छेदं पुन: लिखत- 1 x 6 = 6

एक: जन: एकदा (i) .......................... प्रति गच्छति स्म! स: अचिन्तयत् यत् धिक् (ii) .......................... यत्र शुद्धवायुरपि न प्राप्यते। सहसा स: अचिन्तयत् अधुना अलम् (iii)...............................। स: एतदपि अचिन्यत् यत् (iv) .............................. आरभ्य अहं ग्रामे एव निवासं करिष्यामि। वामत:, दक्षिणत: वा नगरजीवनं (v) ............................... निवासयोग्य: न। अधुना 6.............................. एव मम विश्वास:।

मञ्जूषा- कुत्रापि, नगरजीवनम्, ग्राम्यजीवने, ग्रामम्, अद्यत: नगरजीवनेन।

8. (अ) अधोलिखितवाक्येषु कोष्ठके प्रदत्तौ प्रकृतिप्रत्ययौ संयोज्य रिक्तस्थानपूर्तिं कृत्वा वाक्यानि पुन: लिखत- 1 x 3 = 3

(i) कक्षायां .............................. छात्रा: अध्यापकस्य अनुमतिं याचते। (प्र+विश्+शतृ)।

(ii) पुरस्कारं .............................. छात्र: प्रसन्न: भवति। (लभ्+शानच्)

(iii) मुनिभि: कठोर: तप: .............................. (कृ+क्त)

(आ) अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृतिप्रत्ययौ पृथक्कृत्य लिखित- 1 x 3 = 3

(i) सा अद्य गृहे एव **<u>स्थितवती</u>** ।

(ii) कथां **<u>शृण्वन्</u>** स: प्रेरित: जात: ।

(iii) अध्यापकेन **<u>प्रश्न:</u>** पृष्ट: ।

JSUNIL TUTORIAL

## खण्ड: 'घ' ( पठित- अवबोधनम् ) 35 अङ्का:

9. अधोलिखितं गद्यांशं पद्यांशं नाट्यांशं च पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत-

(अ) गद्यांश: - मात्रा अनुमत: अष्टावक्र: राजसभां गत:। कथमपि सभायां लब्धप्रवेश: स: राजानं सविनयम् प्राणमत् । तस्य वक्रदेहं वीक्ष्य सभास्थिता: पण्डिता: तारस्वरेण अहसन् । "एष: बाल: अस्माभि: सह शास्त्रार्थम् अपि करिष्यति ' इति ज्ञात्वा ते अन्योन्यं पश्यन्त: स्मितम् अकुर्वन् । तेषां पण्डितानां चेष्टितं दृष्ट्वा अष्टावक्र: उच्चै: हसितुम् आरभत। तं हसन्तं विलोक्य सर्वे सभास्थिता: विद्वांस: स्तब्धा: जाता:।

I एकपदेन उत्तरत- ½ x 2 = 1

(i) सभास्थिता: पण्डिता: कथमहसन् ?

(ii) कया अनुमत: अष्टावक्र: राजसभां गत:?

II पूर्णवाक्येन उत्तरत- 2 x 1 = 2

(i) अष्टावक्र: किं दृष्ट्वा उच्चै: हसितुम् आरभत?

III उचितम् उत्तरं चित्वा लिखत-

(i) आगच्छत्' इति पदस्य कि विलोमपदं गद्यांशे प्रयुक्तम् ? 2 x 1 = 2

(अ) प्राणमत् (ब) गत:

(स) हसितुम् (द) अकुर्वन्

(ii) 'विद्वांस:' इति पदस्य विशेषणरूपेण अनुच्छेदे किं पदं प्रयुक्तम् ?

(अ) स्तब्धा: (ब) जाता:

(स) सभास्थिता: (द) पण्डिता:

(आ) पद्यांश: -

निम्ब! त्वदीयचकटुता यदि दाहहन्त्री,<br>
गायन्तु मूढमनुजास्तव दोषगाथा: ।<br>
तप्तास्त एव तपनोपमपित्ततापै:,<br>
गास्यन्ति मित्रवर! तवकगीतकानि ॥

प्रश्ना:-

I एकपदेन उत्तरत- ½ x 2 = 1

(i) के निम्बस्य दोषगाथां गायन्ति?

(ii) कवि: अस्मिन् श्लोके कं सम्बोधयति?

II पूर्णवाक्येन उत्तरत- 2 x 1 = 2

(iii) निम्बस्य गीतकानि के गास्यन्ति ?

JSUNIL TUTORIAL

III उचितम् उत्तरं चित्वा लिखत- 2 x 1 = 2

(i) 'गायन्तु' इति क्रियापदस्य कर्तृपदं किम् ?

(अ) दोषगाथाः (ब) मूढमनुजाः

(स) मित्रवर (द) दाहन्त्री

(ii) 'मधुरता' इति पदस्य विपरीतार्थकं किं पदं श्लोके प्रयुक्तम्

(अ) तप्ता (ब) दोषगाथा

(स) कटुता (द) निजता

(इ) नाट्यांशः-

प्रथमः भिल्लः:- हा धिक्। कीदृशः समयः आगतः। देशभक्तः प्रतापोऽपि स्वदेशं परित्यज्य अन्यत्र प्रस्थितः। द्वितीयः भिल्लः - न जानेऽस्य मेवाऽउदेशस्य भाग्ये किं लिखितम्? हा निष्ठुर दैव! देशभक्ते तु दयस्व।

तृतीयः भिल्लः:- वराकोऽयं जीवनसामग्रीयुद्धसामग्रयोः अभावेन खिद्यते। परमेश्वर! दयस्व! मातृभूमेः दुर्दशां स्वचक्षुषा कथं द्रक्ष्यामः?

सर्वे भिल्लाः विलपन्ति

एकः सैनिकः - हा दैव! कथं देशधर्मौ प्रति निष्ठुरः सञ्जातोऽसि? प्रतापं प्रति महाराज! मदीयेन एव खड्गेन जहि माम्। न शक्नोमि स्वचक्षुषा द्रष्टुं स्वदेशदुर्दशाम्।

सर्वे सैनिकाः - परतन्त्रे देशे जीवनं नरकायते। न शक्नुमः प्राणान् धारयितुम्।

प्रश्नाः-

I एकपदेन उत्तरत- ½ x 2 = 1

(i) वराकोऽयं कयोः अभावेन खिद्यते ?

(ii) प्रतापः कं परित्यज्य अन्यत्र प्रस्थितः?

II पूर्णवाक्येन उत्तरत- 2 x 1 = 2

(i) एकः सैनिकः प्रतापं प्रति किं कथयति?

III निर्देशानुसारम् उत्तरत- 1 x 2 = 2

(i) 'विहाय' इत्यर्थे किं पदं नाट्यांशे प्रयुक्तम्?

(अ) दयस्व (ब) अन्यत्र

(स) अस्य (द) परित्यज्य

(ii) 'मदीयेन एव खड्गेन जहि माम्' अस्मिन् वाक्ये 'माम्' इति पदं कस्मै प्रयुक्तम्?

(अ) प्रतापाय (ब) सैनिकाय

(स) द्वितीयभिल्लाय (द) तृतीयभिल्लाय

JSUNIL TUTORIAL

JSUNIL TUTORIAL

10. निम्नलिखितश्लोकयोः अन्वयं मञ्जूषातः समुचितं पदं चित्वा पूरयत- ½ x 10 = 5

(अ) शेषितो नात्र कश्चिद् भवेत् केनचिद्,
व्याधिना पीडितो नो भवेत्कश्चन।

नात्र कोऽपि व्रजेद् दीनतां हीनताम्,
मोदतां राजतां पावनं भारतम्॥

अन्वयः- अत्र कश्चिद् (i) .................................. शोषितः (ii) .............................. भवेत् कश्चन (iii) .............................. पीडितो नो भवेत्। अत्र कः अपि दीनतां हीनतां न (iv) ...................... पावनं (v) ......................... मोदताम् राजताम्

(आ) नृत्यामि नित्यं धवलास्तरेषु,

सङ्केतिताङ्कैः प्रकटीकरोमि

भावं जनानां हृदयेषु गूढं,

कृष्णाननाऽऽलोच्य वदन्तु काऽहम् ॥

अन्वयः- (अहं) नित्यं (i) ............................ नृत्यामि, जनानां हृदयेषु (ii) ....................... भावं सङ्केतिताङ्कैः प्रकटीकरोमि। (iii) ..........................(अहम्) (iv) .........................? (v) ................................... वदन्तु

| | | | | |
|---|---|---|---|---|
| (i) आलोच्य, | (ii) व्याधिना, | (iii) भारतम्, | (iv) धवलास्तरेषु | (v) का |
| (vi) केनचिद् | (vii) व्रजेद् | (viii) गूढम्, | (ix) न, | (x) कृष्णानना। |

11. रेखाङ्कितानि पदानि आधृत्य प्रश्ननिर्माणं कुरुत 1 x 5 = 5

(i) अष्टावक्रः **जननीम्** अपृच्छत्-मातः क्व आस्ते मम पिता?

(ii) भोजराजेन स्वराज्यात् **अशिक्षितस्य** निःसारणादेशः दत्तः।

(iii) जलबिन्दवः **मधुरं** संगीतं जनयन्ति स्म।

(iv) **नालन्दाविश्वविद्यालये** पञ्चमी विद्या आध्यात्मिकी वभूव।

(v) यः मह्यम् स्नेहं ददाति, अहं तस्मै **ज्योतिः** ददामि।

12. अधोलिखितवाक्यानि कथाक्रमेण संयोज्य लिखत- ½ x 10 = 5

(i) गृहिणी मुनिं भर्तृसेवापर्यन्तं प्रतीक्षितुम् अकथयत्।

(ii) मुनेः क्रोधदृष्ट्या बलाका भस्मसाद् भूत्वा भूमौ अपतत्।

(iii) तपश्चरतः मुनेः उपरि एका बलाका विष्ठाम् अकरोत्।

(iv) पुरा महातपा नाम कश्चित् मुनिः आसीत्।

(v) प्रतीक्षार्थं श्रुत्वा मुनिः गृहिणीमपि क्रोधेन अपश्यत्।

(vi) मुनिः विस्मितः सन् तत्रैवातिष्ठत्, प्रतीक्षानन्तरं च गृहिणीं बलाकावृत्तान्तविषयम् अपृच्छत्।

(vii) मुनिः नगरं गत्वा एकां गृहिणीं भिक्षामयाचत।

(viii) एतद् दृष्ट्वा मुनिः अहङ्कारयुक्तः अजायत।

13. प्रसङ्गानुसारं रेखाङ्कितपदानाम् उचितम् अर्थं चित्वा लिखत- 1 x 5 = 5

(i) एतद् **<u>अवगत्य</u>** प्रेरित: स: तृषाकुलतां विस्मृत्य वेगेन आश्रमम् आगतवान्।

(अ) गत्वा (ब) न गत्वा

(स) ज्ञात्वा (द) न ज्ञात्वा

(ii) सर्वे अमात्या: कर्मचारिण: च यथास्थानम् अध्यासते।

(अ अध्ययनशीला: (ब) अध्ययनार्थम् आगता:

(स) अधिकारिण: (द) उपविष्टा: आसन्

(iii) धन्या: **<u>महीरुहा:</u>** येभ्य: निराशा: यान्ति नार्थिन: ।

(अ) महीपाला: (ब) महीभृता:

(स) तरव: (द) महीधरा:

(iv) यानस्य अङ्गं **<u>हरे:</u>** शस्त्रं चिह्नं भारतभूपते ।

(अ) विष्णो: (ब) मुने:

(स) शिवस्य (द) गणेशस्य

(v) नगरपालं **<u>समाहूय</u>** आदिश्यताम्

(अ) कथयित्वा (ब) आह्वानं कृत्वा

(स) उपसृत्य (द) आहवय

**अङ्कयोजना**

**खण्ड: क- (अपठित-अवबोधनम्)** **10 अङ्का:**

| प्रश्नसङ्ख्या | | अपेक्षित-उत्तराणि | अङ्का: |
|---|---|---|---|
| 1. | I | (i) शयनेन | ½ |
| | | (ii) अत्याचारेभ्य: | ½ |
| | | (iii) नृप: | ½ |
| | | (iv) संन्यासी | ½ |
| | II | (i) संन्यासी हसित्वा इदम् अवदत् – 'यावदधिकं भवान् स्वस्यसि तावदधिकमेव प्रजा भवत: अत्याचारेभ्य: मुक्ता स्थास्यति । तावदेव भवत: पापानामपि क्षय: भविष्यति। 'इति | 2 |
| | | (ii) नृप: विस्मयेन सन्यासिनम् इदमपृच्छत् – 'एतत् कीदृशं करणीयं कथ्यते भवता । शयनेन कीदृशं पुण्यं प्राप्तुं शक्यते मया? अहं तु सर्वथासमर्थ: एतदवगन्तुम् 'इति। | |

JSUNIL TUTORIAL

III नृप: संयासी च, पापानां क्षयस्य प्रकार:, निर्भीक: संन्यासी, राज्ञ: कर्तव्य: अथवा किमपि अन्यत् समुचितं शीर्षकम् 2

IV (i) विस्मयेन ½

(ii) शयनम् ½

(iii) नृपाय ½

(iii) प्रजा ½

**खण्ड: 'ख' - 15 अङ्.का:**

पत्रलेखनम् ½ x 10 = 5

2. (i) फरीदाबादत:

(ii) मित्र

(iii) निराश:

(iv) मानवजीवनम्

(v) प्रयत्नम्

(vi) धैर्येण

(vii) सर्वोत्तमा

(viii) चिन्तयति

(ix) जीवनाकाङ्.क्षी

(x) अभिन्नम्

3. मञ्जूषात: शब्दान् गृहीत्वा अथवा स्वबुद्ध्या छात्र: चित्रस्य वर्णनं संस्कृतेन पञ्चवाक्येषु करिष्यन्ति। 2 x 5 = 10

अथवा

स्वयं मञ्जूषप्रादत्तानां पदानां सहायतया 'वनानां महत्वम् 'इति विषयमधिकृत्य छात्रा: पञ्चवाक्यानि लेखिष्यन्ति।

**खण्ड: 'ग' (अनुप्रयुक्त-व्याकरणम्) 30 अङ्.का**

4. (i) राज्ञाम् ½ x 12 = 6

(ii) भवन्तम्

(iii) राज्ञि

(iv) आत्मन:

(v) विद्वद्भ्य:

(vi) गच्छते

(vii) विद्वांस:

(viii) भवन्त:

(ix) गच्छद्भि:

SUNIL TUTORIAL

(x) विदुषे

(xi) आत्मानम्

(xii) गच्छत्सु

5. (i) चत्वारः ½ x 12 = 6

(ii) एकस्याम्

(iii) त्रिषु

(vi) पञ्च

(v) तिस्रः

(vi) द्वाभ्याम्

(vii) एकस्मै

(viii) चतुर्भिः

(ix) चतसृणाम्

(x) द्वयोः

(xi) एकस्याः

(xii) त्रिभिः

6. (i) अस्तु ½ x 12 = 6

(ii) पठेम

(iii) इच्छ

(iv) कुर्यात

(v) चिन्तयन्तु

(vi) नमेव

(vii) रोचन्ताम्

(viii) याचस्व

(ix) सेवेमहि

(x) मोदेथाः

(xi) पचेत्

(xii) भजै

7. (i) ग्रामम् 1 x 6 = 6

(ii) नगरजीवनम्

(iii) नगरजीवनेन

(iv) अद्यतः

SUNIL TUTORIAL

(v) मम

(vi) ग्राम्यजीवने

8. (अ) (i) प्रविशन्ती 1 x 3 = 3

(ii) लाभमान:

(iii) कृतम्

(आ) (i) स्था, क्तवतु 1 x 3 = 3

(ii) श्रु, शतृ

(iii) प्रच्छ्,क्त

**खण्ड: 'घ' पठित- अवबोधानम्** **35 अङ्का:**

9. (अ) गद्यांश: I (i) तारस्वेण ½ x 2 = 1

(ii) मात्रा

II अष्टावक्र: तेषां (सभास्थितानां)

पण्डितानां चेष्टितं दृष्ट्वा उच्चै: हसितुमारभत । 2 x 1 = 2

III (i) गत: 1 x 2 = 2

(ii) सभास्थिता:

(आ) पद्यांश: I (i) मूढमनुजा: ½ x 2 = 1

(ii) निम्बवृक्षम्

II निम्बस्य गीतकानि तपनोष्मपित्ततापै:

तप्ता: जना: गास्यन्ति। 2 x 1 = 1

III (i) मूढमनुजा:

(ii) कटुता 1 x 2 = 2

(इ) नाट्यांश: I (i) जीवनसामग्रीयुद्धसामग्र्यो: ½ x 2 = 1

(ii) स्वदेशम्

II एक: सैनिक: प्रतापं प्रति इदं कथयति- 2 x 1 = 2

''महाराज! मदीयेन एव खड्गेन जहि माम्!

न शक्नोमि स्वचक्षुषा द्रष्टुं स्वेदशदुर्दशाम्। ।'' इति

III (i) परित्यज्य 1 x 2 = 2

(ii) सैनिकाय

10. (अ) (i) केनचिद् ½ x 5 = 2½

(ii) न

(iii) व्याधिना

JSUNIL TUTORIAL

(iv) व्रजेद्

(v) भारतम्

(आ) (i) धावलास्तरेषु ½ x 5 = 2½

(ii) गूढम्

(iii) आलोच्य

(iv) कृष्णानना

(v) का

11. I अष्टावक्र: जननीम् **किम्** अपृच्छत्? 1 x 5 = 5

II भोजराजेन स्वराज्यात् **कस्य** नि:सारणादेश: दत्त:?

III जलबिन्दव: **कीदृशं** संगीत जनयन्ति स्म?

IV नालन्दाविश्वविद्यालये **कतमा** विद्या आध्यात्मिकी बभूवा ।

V य: मह्यं स्नेहं ददाति , अहं तस्मै **किम्** ददामि?

12. (i) पुरा महातपा नाम कश्चित् मुनि: आसीत् । ½ x 10 = 5

(ii) तपश्चरत: मुने: उपरि एका बलाका विष्ठाम् अकरोत् ।

(iii) मुनि: क्रोधोन बलाकाम् अपश्यत् ।

(iv) मुने: क्रोधादृष्ट्या बलाका भस्मसाद् भूत्वा भूमौ अपतत् ।

(v) एतद् दृष्ट्वा मुनि: अहड्.कारयुक्त: अजायत् ।

(vi) तत: मुनि: नगरं गत्वा एकां गृहिणीं भिक्षामयाचत् ।

(vii) गृहिणी मुनिं भर्तृसेवापर्यन्तं प्रतीक्षितुम् अकथयत् ।

(viii) प्रतीक्षार्थं श्रुत्वा मुनि: गृहिणीभपि क्रोधेन अपश्यत् ।

(ix) गृहिणी हसित्वा अवदत् "मुने! नाहं बलाकेति ।

(x) मुनि: विस्मित: सन् तत्रैवातिष्ठत्, प्रतीक्षानन्तरं च गृहिणीं बलाकावृत्तान्तविषये अपृच्छत् ।

13. (i) ज्ञात्वा 1 x 5 = 5

(ii) उपविष्टा: आसन्

(iii) तरव:

(iv) विष्णो:

(v) आह्वानं कृत्वा

JSUNIL TUTORIAL